"दर्शपूर्णमासयोः पूर्वमौषधधर्माः समाम्नाताः, ततः आज्यस्य। तत्र सन्देहः,—किम् अग्नीषोमीयधर्माणाम्, मुख्यक्रमेण पूर्वम् आज्यस्य धर्माः कर्त्तव्याः! उत यथापठम् ?-इति। मुख्यक्रमानुग्रहेण आज्यस्य पूर्वम्,-इति प्राप्ते ब्रूमः,-प्रकृतौ यथापाठं प्रतीयेत, स्वशब्दो हि तेषां पाठक्रमः, सः अन्यथा क्रियमाणो बाधितः स्यात्, सहत्वस्य पुनरुपसङ्ग्राहकः प्रयोगवचनः स्वक्रमेण पदार्थे सन्निकर्षकारणे न बाधितो भविष्यति। अपि च पाठक्रमे स्वशब्दः,—"स्वाध्यायोऽध्येतव्यः" मुख्यक्रमेण प्रयोगवचनैकवाक्यता सूक्ष्मा" भा०

"मन्त्रतस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्मात् उत्पत्तिदेशः सः" १६ सू०

"दर्शपूर्णमासयोः, आग्नेयस्य पूर्वं मन्त्रपाठः, उत्तरो ब्राह्मणस्य। तत्र सन्देहः-कतमः पाठो बलीयान्?-इति। उच्यते,-अनियमः, नियमकारिणः शास्त्रस्य अभावात्-इति॥

एवं प्राप्ते ब्रूमः,-मन्त्रपाठो बलीयान्। कुतः? प्रयोगरूपसामर्थ्यात्'—प्रयोगाय मन्त्रस्य रूपसामर्थ्यं, तदस्य सामर्थ्यं येन मन्त्रः प्रयुज्यते, तस्य च प्रयुज्यमानस्य क्रमो दृष्टाय भवति। 'ननु च ब्राह्मणपाठस्य अपि तदेव प्रयोजनम्'। उच्यते-उत्पत्तिदेशः सः'-अपरमपि तस्य प्रयोजनं कर्मोत्पत्त्यर्थं भविष्यति" भा०

"तद्वचनाद्विकृतौ यथाप्रधानं स्यात्" १७ सू०

"अस्ति अध्वरकल्पा नामेष्टिः,—'आग्नावैष्णवम् एकादशकपालं निर्वपेत्, सरस्वती आज्यभागा स्यात् बार्हस्पत्यश्चरुः'—इति। तत्र सन्देहः—किम् आग्नेयविकारस्य बार्हस्पत्यस्य पूर्वं धर्माः कार्य्याः, चोदको बलवत्तरः, प्रयोगवचनात्, उत उपांशुयागविकारस्य प्रयोगवचनो बलवत्तरः, चोदकात् ?—इति। किम् प्राप्तम्?—'विकृतौ' अस्यां 'यथाप्रधानं स्यात्' 'तद्वचनात्'—तेषां साक्षाद्वचनक्रमो विकृतौ, तेन सन्निहितानाम् उपसंहारकः प्रयोगवचनो हि प्रत्यक्षः, तद्धर्माणां च आनुमानिकः चोदकेन हि स प्राप्तः। तस्मात् प्रत्यक्षः प्रयोगवचनो बलवत्तरः, तेन चोदक आनुमानिको बाध्यते भा०

"विप्रतिपत्तौ वा प्रकृत्यन्वयाद्यथाप्रकृति" १८ सू०

मुख्याङ्गक्रम—विप्रतिपत्तौ वा यथा प्रकृतौ, तथैव विकृतौ भवितुमर्हति—इति। कुतः?। 'प्रकृत्यन्वयात्' यादृशाः प्रकृतौ धर्माः, तादृशा एव विकृतौ भवितुमर्हन्ति—इति, मुख्यक्रमेण क्रियमाणा न प्रकृतिवत् कृताः स्युः?। चोदको हि प्रयोगवचनात् बलवत्तरः, स हि उत्पादयति प्रापयति च। प्रापितान् अभिसमीक्ष्य प्रयोगवचन उपसंहरति, स प्राप्तेषु उत्पन्नः प्राप्तिनिमित्तक उत्तरकालं पूर्वप्राप्तं न बाधितुमर्हति चोदकं, प्रत्यक्षोऽपि सन्, बहिरङ्गत्वात्, यथाप्राप्तानेवोपसंहरिष्यति। तस्मात् पूर्वं बार्हस्पत्यस्य धर्माः, तत आज्यस्य" भा०। एतच्च स्पष्टतया तत्त्वबोधिन्यां दर्शितं यथा

"अग्निहोत्रं जुहोति यवागूं पचतीत्यादौ अनुष्ठेयानामनुष्ठानक्रमनियमोऽस्ति नवेति। तत्र न क्रमनियमः तत्प्रापकप्रमाणाभावादिति प्राप्ते क्रमनियमप्रापकाण्याह श्रुत्यर्थपठनस्थानमुख्यप्रावर्त्तिकाः क्रमाः। १श्रुतिरानन्तर्य्यबोधकमथशब्दक्त्वाप्रत्ययादिकम्। २अर्थः प्रयोजनं,३पठनं पाठक्रमः ४स्थानं स्वस्थानस्थितिः, यथा आश्विनकत्वरुसामीप्यं सवनीयपशोः,। स्थानं स्वोत्पत्तिवाक्यमिति केचित्। ५मुख्यं प्रधानं कर्म्म। ६प्रवृत्तिः प्रवर्त्तनक्रमः। प्रावर्त्तिकेति तद्धितेन प्रवृत्तिगम्यत्वाभिधायकेन श्रुत्यादिपदानां श्रुतिगम्यत्वादिपरत्वं सूचितं तथा च श्रुत्यादीनि क्रमप्रापकाणीति। अत्र श्रुत्यादीनां क्रमप्रापकताबोधकसूत्राणि बहूनि उक्तानि तानि च ग्रन्थगौरवभयात् निरूप्यमाणसूत्रार्थविवेचनेन व्यक्तीभविष्यत्त्वाच्च न लिखितानि। तत्र श्रुतितो यथा "द्वादशाहसत्रयागे "अध्वर्य्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो होतारमिति" आनन्तर्य्यार्थकक्त्वाप्रत्ययेन क्रमो बोध्यते। यथा वा "हृदयस्याग्रेऽवद्यति, अथ जिह्वायः अथ वक्षसः" इति अथशब्देन। अयं च क्रमोऽन्येभ्यो बलवान् शब्दलभ्यत्वात्। एवमेषां पूर्व्वत उत्तरोत्तरं दुर्ब्बलं बोध्यम्। नन्वथादिशब्दादुपस्थितस्यापि क्रमस्य धात्वर्थरूपक्रियात्वाऽभावेन कथं विधेयत्वं तदिदमुक्तं प्रापकप्रमाणाभावादिति चेदुच्यते यथा दध्ना जुहोतीत्यादौ अक्रियारूपं दधिद्रव्यं क्रियाविशेषणं सद्विधीयते दधिसाधनकं होमं कुर्य्यादिति तथा इदमनेन क्रमेण कर्त्तव्यमिति क्रियाविशेषणतया क्रमो विधीयते। तथा च सूत्रम् "श्रुतिलक्षणमानुपूर्व्यं तत्प्रधानत्वात्" आनुपूर्व्यं श्रुतिगम्यं विधिगम्यं तस्य क्रमस्य प्रधानत्वात् दध्यादिवत् क्रियाविशेषणत्वेन विधेयत्वात्। तच्च क्वचित् श्रुतशब्दादथादितः क्वचिच्चार्थादितोऽनुमानादिति विशेषः। इत्थञ्च श्रुतिगम्यं श्रुति